|| ओ३म् ||
उद्भासिताऽखिलखलस्य विश्रृङ्खलस्य प्राग्जातविस्तृतनिजाधमकर्मवृत्ते:। दैवादवासविभवस्य गुणद्विषोऽस्य नीचस्य गोचरगतै: सुखमाप्यते कै:।।५९।।
(नीतिशतकम्)

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2021-23

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवाद:

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालय: ए-२/३२, वजीराबाद मार्ग:, भजनपुरा, देहली-११००५३, दूरभाष: ९३११०८६७५१
ई-मेल: sanskritsamvad@gmail.com वेवसाइट: www.sanskritsamvad.com मूल्यम्-रू. १०/-

|| ओ३म् ||
आरम्भगुर्वी क्षयिणी क्रमेण लध्वी पुरा वृद्धिमती च पश्चात्। दिनस्य पूर्वार्धपरार्धभिन्ना छायेव मैत्री खलसज्जनानाम्।।६०।।
(नीतिशतकम्)

卐 वर्षम्-११ 卐 अंक:-०९ (२४९) 卐 १ नवम्बरमास: २०२१त: १५ नवम्बरमास: २०२१ पर्यन्तम् 卐 विक्रमसंवत्-२०७८ 卐 सृष्टिसंवत्-१,९६,०८,५३,१२१ 卐 पृष्ठम्-८

## देववाणीपरिषदा सम्मानित: चतुस्त्रिंशत्तम: पण्डितराजमहोत्सव:

दिल्लीस्थया देववाणीपरिषदा 20 अक्टूब '2021 तदनुसारं शरत्पूर्णिमायां 2078 तमे वैक्रमाब्दे बुधवासरे 34तम: पण्डितराजमहोत्सव: समामानित:। अस्मिन् वर्षे पण्डितराज-सम्मान: 2021 हिमाचलप्रदेशस्य संस्कृतविदुषे महाकवये च आचार्याय श्रीकेशवरामशर्मणे समर्पित:। कार्यक्रमस्य मुख्यातिथिना केन्द्रीयसंस्कृतविश्वविद्यालयस्य दिल्लीस्थस्य कुलपतिना आचार्येण के. बी. सुब्बारायुडुना



परिषदध्यक्षेण च आचार्यरमाकान्तशुक्लेन आचार्यकेशवरामशर्मणे सम्मानरूपेण प्रमाणपत्रं, एकादशसहस्ररूप्यकाणि, परिचय-प्रशस्ति-पत्रम् ऊर्णावस्त्रं चार्पितानिद्य अत्रावसरे आचार्यस्य श्रीकेशवरामशर्मण: धर्मपत्नी श्रीमती तरुणा शर्मा अपि उपस्थिता अभूत् यस्या: स्वागतं परिषद: संरक्षिकया श्रीमत्या रमादेव्या कृतम् । आचार्यसुधीकान्तभारद्वाजस्य ग्रन्थत्रयस्य (1. 'कुरूद्भवम्'

शेषभाग:द्वितीयेपुटे

## उत्तराखंडसंस्कृताकादमीद्वारा श्रीलालबहादुरशास्त्रिजयंत्या: अवसरे अखिलभारतीयसंस्कृतकविसम्मेलनम् आयोजितम्

डॉ. हरीशचन्द्र गुरुरानी

(हरिद्वारम्) उत्तराखण्ड संस्कृत अकादम्या संस्कृतस्य प्रचाराय, प्रसाराय, नवकाव्यसर्जनाय च महात्मागान्धिन: श्रीलालबहादुरशास्त्रिणश्च जयन्तीम् उपलक्ष्य अन्तर्जालीयम् अखिलभारतीयसंस्कृतकविसम्मेलनं समायोजितम्। सम्मेलनेऽस्मिन् अतिथय:, संस्कृतकवय:, श्रोतारश्च गूगलमीटमाध्यमेन सोत्साहेन भागं गृहीतवन्त:।



प्रो0 अभिराज राजेन्द्र मिश्र:
पूर्वकुलपति:
सम्पूर्णानन्दसंस्कृतविश्वविद्यालय:
वाराणसी



प्रो0 देवीप्रसाद त्रिपाठी
कुलपति:
उत्तराखण्डसंस्कृतविश्वविद्यालय:
हरिद्वारम्



डॉ0 सुभाषचन्द्र थलेडी
पूर्वनिदेशक:
दूरदर्शनम्

कार्यक्रमस्य अध्यक्षतां कुर्वन् सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिचर: पद्मश्रीविभूषित: प्रो. अभिराजराजेन्द्र मिश्रमहोदय अवदत् यत् विश्वऽस्मिन् प्रामाणिकज्ञानस्य विज्ञानस्य अनुसन्धानस्य चिन्तनस्य च आधार: संस्कृतभाषा अस्ति। तेनोक्तं यत् संस्कृतं विना भारतीयज्ञानस्य विज्ञानस्य संस्कृते: संस्कारस्य अन्यभारतीयभाषाणां च ज्ञानं कठिनमस्ति।

कार्यक्रमस्य मुख्यातिथि: उत्तराखण्डसंस्कृतविश्वविद्यालयस्य कुलपति: प्रो. देवीप्रसाद त्रिपाठिमहोदय: भाषमाण अवदत् संस्कृतभाषा अस्माकं वैज्ञानिकताया: आध्यात्मिकताया: नैतिकतायाश्च स्रोतस्विनी अस्ति। प्रो. त्रिपाठिना उक्तं वाल्मीकिरामायणग्रन्थादारभ्य अद्यावधि:

शेषभाग:द्वितीयेपुटे

## महर्षिवाल्मीकिजयंत्या: अवसरे उत्तरप्रदेशसंस्कृत-संस्थानद्वारा विशालसंस्कृतप्रतियोगितानाम् आयोजनम्

महर्षिवाल्मीकिजयन्तीमभिलक्ष्य उत्तरप्रदेशसंस्कृतसंस्थानेन राज्यस्तरे प्रथमकक्षात: शोधकुर्वतां छात्राणां कृते १४ संस्कृतप्रतियोगिता: समायोजिता:। ऑनलाइन, आफलाइनमाध्यमयो: प्रतियोगितासु सम्पूर्णप्रदेशेभ्य: द्विसहस्राधिका: संख्याका: छात्रा: प्रतिभागं कृतवन्त:।

आश्विनशरत्पूर्णिमायां २० दिनांके एकसह समग्रेप्युत्तरप्रदेशे प्रतियोगिता: समारब्ध:। तद्दिने



संस्थानपरिसरात् माननीयैरध्यकगषमहोदयै: आनलाइन सम्बोधनेन प्रदेशस्य अष्टादशमण्डलेषु प्रतियोगितानां आरम्भ: कृत:।

सर्वस्यापि समारोहस्य सम्यक्तया समायोजनाय चत्वार: राज्यसंयोजका: तेषु आचार्यकुशलदेव:, डॉ. अरविन्दकुमारतिवारी, डॉ. चन्द्रकान्तदत्तशुक्ल, डॉ. शालिग्राम त्रिपाठी च आसन। प्रतिमण्लमपि अष्टादश संयोजका:, चत्वार: ऑनलाइन संयोजका:, मण्डल,राज्यसतरयो: सर्वाषां प्रतियोगितानां कृते १२५ निर्णायकाश्च नियुक्ता: आसन्।

सर्वाषामपि प्रतियोगितानां विजेतृभ्य: राज्यस्तरे प्रथम, द्वितीय तृतीय एवं चतुर्भ्य: सान्त्वनायां एकादशसहस्रं, सप्तसहस्रं, पञ्चसहस्रं, सान्त्वनायाम् एकैकं सहस्रम्।

मण्डलस्तरे च त्रिसहस्रं, द्विसहस्रं सहस्रमेकञ्च राशिपुरस्कारा: प्रमाणपत्राणि च प्रदत्तानि।

अवसरेमिन् १८ त: २० यावत् अखिलभारतीयसंस्कृतकविसम्मेलनम् अपि सम्पन्नमभवत्। अस्मिन् सम्पूर्णदेशेभ्य: ५४ प्रख्यात: संस्कृतकवय: स्वस्वकाव्यपाठं श्रावितवन्त:।

## आचार्य: प्रो. मुरलीमनोहरपाठक: कुलपति: जात:

**नवदेहली।** दीनदयाल-उपाध्यायगोरखपुर विश्वविद्यालयस्य संस्कृतविभागस्य प्रो. मुरली मनोहर पाठक: श्रीलालबहादुरशास्त्रिकेंद्रीयसंस्कृत विश्वविद्यालयस्य (नई दिल्ली) कुलपति:नियुक्त:। गोरखपुरविश्वविद्यालयस्य कुलपति प्रो. राजेश सिंह: प्रो. पाठकाय वर्धापनानि अदात्।



प्रो. मुरली संस्कृतविधाक्षेत्रे कृतकार्याणां कृते हिंदीसाहित्यसम्मेलने महामहोपाध्यायस्य मानदोपाधिद्वारा विभूषित: ।

लारस्य वैश्यकर्णी वार्डनिवासिन: मुरली मनोहर पाठकस्य प्रारंभिक शिक्षा नगरस्य प्राथमिकविद्यालयत: अभवत् ।तत: तेन स्वामीदेवनंदमठविद्यालयत: दशमी,द्वादशी च समुत्तीर्णा, प्रयागराजविश्वविद्यालयत: स्नातकस्य परास्नातकस्य अध्ययनं कृत्वा प्रथमश्रेणी अवाप्ता। प्रो. पाठक: प्रथमतया 1990तमे वर्षे विक्रम विश्वविद्यालये , उज्जैने सहायकप्रवक्ता नियुक्त: ।2006 तमे वर्षे गोरखपुरविश्वविद्यालये संस्कृत विभागस्य प्रवक्ता नियुक्त: । प्राथमिक शिक्षक संघस्य अध्यक्ष: गोविन्द मिश्रा, शिक्षक सभाया: उप जिला संयोजक: बलबीर सिंह दादा, शिक्षक शिशिर राय:, भाजपा नेता विमलेश पाल धनगर:, कुलदीप विनय त्रिपाठी, कन्हैया पांडेय:, अजित सिंह:, निकुंज तिवारी, अनीस फातिमा, मुशर्रफ अफरोज फातिमा, मुकेश धर्मेंद्र कुमारश्च अमुस्मै विदुषे वर्धापनानि दत्तवन्त:।

# पण्डितविष्णुकान्तशुक्ल-महोदयस्य जन्मदिवसोपलक्ष्ये समायोजितं वैश्विकसंस्कृतकविसम्मेलनम्

वार्ताहरः वत्स-देशराजशर्मा

हिमाचलप्रदेशः। पण्डितविष्णुकान्तशुक्ल महोदयस्य जन्मदिवसोपलक्ष्ये वैदिकगणेन समायोजितं वैश्विकसंस्कृतकविसम्मेलनम्।

अस्य कार्यक्रमस्य सत्रोद्घाटनकर्ता पण्डितश्रीउमाकान्तशुक्लमहाभागाः प्राघुणिकपुङ्गवाः




पद्मश्री डॉ.रमाकान्तशुक्लमहाभागाः, कार्यक्रमस्य अध्यक्षः प्रो० धर्मदत्तचतुर्वेदीमहाभागाः सारस्वतातिथयः डॉ.निरञ्जनमिश्रमहाभागाः, आचार्यः अरविन्दपाण्डेयः समायोजकः वत्स-देशराजशर्मा वैदिकगणसंस्थापकः छोटी काशी मण्डी हिमाचलप्रदेशवास्तव्यः कार्यक्रमेऽस्मिन् समामन्त्रितकविसमवायः प्रो.माधव मुरलीधर देशपाण्डे महाभागाः अमेरिकातः,कुशाग्रानिकेतः अमेरिकातः, डॉ. सुधा कोडुन्तिरप्पुल्लि कृष्णन् कर्नाटकात,कु.श्रुति कानिटकर महाराष्ट्रप्रदेशतः, डॉ.प्रज्ञा शरद देशपांडेयः महाराष्ट्रप्रदेशतः सहदेव जोषी अलूक्षः गुर्जरप्रदेशः सोमदत्त शर्मा आसरी वैदिकगणप्रतिनिधिः हरियाणाप्रदेशः, डॉ.सुबोधकुमारमिश्रभागवती वैदिकगणप्रतिनिधिः असमप्रदेशः प्रवीणपौडैलः वैदिकगणप्रतिनिधिः नेपालदेशस्थः विष्णुप्रसादद्विवेदी वैदिकगणप्रतिनिधिः मध्यप्रदेशः च आसन्। कार्यक्रमस्य शुभारम्भः वैदिकमङ्गलाचरणेन वेदाचार्येण नवीन उप्रेती महोदयेन कृतः। कार्यक्रमस्य मञ्च-सञ्चालनं।

यस्य दासा अनुप्रासा रसा यस्य वशा इव।
ध्वनिः काव्याध्वनि प्रायः सहदेवकविः स नः।।

एतादृशाः

पूज्य भाईश्रीरमेशभाईओझासंचालित श्रीसान्दीपनिविद्यानिकेतनम् पोरबन्दर इत्यत्र संस्कृतमहाविद्यालये साहित्यविषयस्य प्राध्यापकाः सहदेव जोषी (अलूक्षः) महोदयाः कृतवन्तः। कार्यक्रमस्य समापनं डॉ शिवकुमार महोदयेन पूर्णाहुति- मन्त्रेण विहितं शम्।।

---

प्रथमपुटस्य शेषभागः

## देववाणीपरिषदा समामानितः...

2. 'भारतीयसंस्कृतिप्रभा' 3. 'संस्कृत लिंग्विस्टिक्स') लोकार्पणमभूत् । अत्रावसरे श्रीलालबहादुरशास्त्रिराष्ट्रिय- संस्कृतविश्वविद्यालयस्य वेदवेदाङ्गविभागाध्यक्षः आचार्यः प्रेमकुमारशर्मा सारस्वतातिथिरूपेण वेदविभागस्य आचार्यः विद्यावाचस्पतिः डॉ. देवेन्द्रमिश्रः विशिष्टातिथिरूपेण




उपस्थितौ आस्ताम्। सममेव आचार्यरामसलाही द्विवेदी, आचार्यदिवाकरदत्तशर्मा, आचार्यपरमानन्दभारद्वाजः, आचार्यसुधीकान्तभारद्वाजः, आचार्यः श्री एम. किशन् इत्यादयो विद्वांसः स्ववक्तव्यानि प्रस्तुतवन्तः। आचार्यकेशवरामशर्मणः अध्यक्षतायाम् आचार्यरमाकान्तशुक्लः, डॉ रेखा व्यासः, डॉ सर्वेशकुमारमिश्रः, ऋषिराजपाठकः, आचार्यसुधीकान्तभारद्वाजश्च बहुभाषाकाव्यगोष्ठ्यां काव्यपाठमकार्षुः। डॉ. बृजेशगौतमः, श्रीशशिपालशर्मा, श्रीविनोदबब्बरः, श्रीवेदप्रकाशशर्मा च श्लोकपाठमकुर्वन्। सुरवेणीसंस्थापकः पण्डित आशीषनारायणत्रिपाठी पण्डितसुरम्यनारायणत्रिपाठी च पण्डितराजजगन्नाथस्य पद्यानां गानं संस्कृतश्लोकानां च संगीतमयं गानं प्रस्तुतवन्तौद्य वरदशुक्लः श्लोकपाठमकरोत्। श्रीरविकुमारः, विपुलजोशी शिवाङ्गी च चित्राङ्कनसहयोगमकुर्वन्। परिषदध्यक्षेण आचार्यरमाकान्तशुक्लेन पण्डितराजजगन्नाथस्य व्यक्तिमत्त्वं कृतित्वं च वर्णयता 'भाति मे भारतम्' इति काव्यं मनोहारिण्या वाचा श्रावितम्। डॉ. ऋषिराजपाठकः धन्यवादमकरोत्।



विश्वस्य सर्वतः अधिकमुस्लिमजनसंख्याकस्य इंडोनेशियादेशस्य प्रथमराष्ट्रपतेः सुकर्णोमहोदयस्य पुत्री सुकमावती ने अद्य स्वीयजन्मदिनस्य अवसरे साहसिकः निर्णयः स्वीकृत्य इस्लामधर्मं त्यक्त्वा पूर्णविधिविधानेन हिंदूधर्मः स्वीकृतः सुकमावती इंडोनेशियायाः एकस्मात् बृहद्प्रतिष्ठितराजनीतिकपरिवारात् अस्ति अतः एवं मान्यते यत् एतस्मान्निर्णयात्परं वृहत्संख्यायां तत्र जनाः हिंदूधर्मं स्वीकुर्वाणाः सन्ति।

# अभिव्यक्तेः सूत्रे प्रो. मिश्र अवोचत्- व्याकरणं व्यावहारिकरूपेण आनेतव्यम्

नाथद्वारा। संस्कृतस्य संस्कृतेश्च वर्धनोद्देश्यम् आधारीकृत्य 'अभिव्यक्ति संस्कृत की डोर संस्कृति की ओर' इत्यस्य चलच्चित्रे जगद्गुरुरामानंदाचार्यराजस्थानसंस्कृत विश्वविद्यालयजयपुरस्य व्याकरणवेददर्शनस्य विभागाध्यक्षदेश प्रो. राजधर मिश्रः , संयोजिका संचालिका डॉ. दीपा मिश्रा च विशेष संवादम् अकुर्वाताम् । तत्र संस्कृत व्याकरणम् आधारीकृत्य विशेषसंवादः वर्तमानपरिप्रेक्ष्ये संस्कृतव्याकरणस्य उपयोगितायाम् आधारित आसीत्। प्रो. मिश्रः अवोचत् यत् यदि भाषासंबद्धदोषाः दूरीकरणीयाः, शिक्षार्थिषु व्याकरणं प्रति रुच्युत्पन्ना करणीया अस्ति चेत् पूर्वं व्याकरणं व्यावहारिकं करणीयम्। तेनोक्तं यत् प्राचीनपद्धत्या शास्त्रीयज्ञानस्य शिक्षार्थिषु वहनापेक्षया लघु-लघुपदैः, वाक्यैश्च व्यावहारिकरूपं प्रदातव्यम्। तेन युववर्गस्य आह्वानं कुर्वन् उक्तम् यत् आध्यात्मिकशांतये संस्कृतस्य वरणं सर्वथा उचितमेव ।

---

प्रथमपुटस्य शेषभागः

## उत्तराखंडसंस्कृताकादमीद्वारा श्रीलालबहादुरशास्त्रिजयंत्याः...

संस्कृतभाषायां यावन्ति काव्यानि महाकाव्यानि वा लिखितानि, तेषु सर्वेषु मानवता, वैज्ञानिकता, आध्यात्मिकता, सामाजिकता, समरसता, नैतिकता च निहिता विद्यते।

कार्यक्रमस्य विशिष्टातिथिना दूरदर्शनस्य पूर्वनिदेशकेन डॉ सुभाषचन्द्र थलेडीमहोदयेन कथितम्



संस्कृतसाहित्ये यावज् ज्ञानभण्डार अस्ति तावत् विश्वस्य कस्मिंश्चदपि साहित्ये नास्ति। इदं ज्ञानं समाजस्य सर्वेषु क्षेत्रेषु प्राप्येत् सर्वकारेण तादृशः प्रयत्नो विधेयः।

संस्कृतकविसम्मेलने काव्यपाठं कुर्वन् प्रो राजेन्द्र मिश्रः अकथयत् भारते उषित्वाऽपि ये भारतं दूषयन्ति तादृशेभ्यः जनेभ्यः निर्जीवः मृदंगोऽपि कथयति- 'ब्रूते धिक् धिक् धिग् इति मृदंगो धिक् तादृशं जीवनम्', वाराणस्याः कविः प्रो हरिप्रसाद अधिकारी अवदत्' भारतं भाजतां सदा, प्रयागराजस्य कविः डॉ राजेन्द्र त्रिपाठी रसराजः कथयति 'गृहे गृहे ग्रामे नगरे वा स्वच्छभारतं करणीयम्, लखीमपुरखीरीजनपदस्य संस्कृतकवयित्री डॉ सुरचना त्रिवेदी अवादीत् 'भवेत् सुभारते सदा हि राष्ट्रभक्तिभावना', हिमाचलप्रदेशस्य कविना डॉ श्रीनाथधर द्विवेदिना उक्तं शबिना भाषाम् अभिव्यक्तौ समर्थे लोचे', देहरादूनस्य कविः डॉ रामविनय सिंहः अवदत् 'सखे धन्येऽयं भारतभूः', रुद्रप्रयागस्य कविः आचार्य सुरेशानन्द गौडः अकथयत् 'जयति जय भारतम्, पिथौरागढ़स्य युवकविः डॉ हेमचन्द्र बेलवालः अवदत्' क्व गते सुखदाः दिवसाः मे, पौड़ीगढ़वालस्य युवकविना डॉ राहुल पोखरियालेन उक्तं 'प्रसरतु भुवने संस्कृतवाणी' इत्थं संस्कृतकविनां काव्यपाठं श्रावं श्रावं श्रोतारः मुग्धाः समभवन्। कार्यक्रमस्य सञ्चालनम् संयोजक अकादम्याः शोधाधिकारी डॉ हरीशचन्द्र गुरुरानी कृतवान् सहैव कविसम्मेलनस्य शुभारम्भं काव्यमयसरस्वतीवन्दनया कृतवान्। कार्यक्रमे वैदिकमंगलाचरणं शान्तिमन्दिर-वेदपाठशालायाः वेदाचार्यः नवीन उप्रेती कृतवान्।

अवसरेऽस्मिन् अकादम्याः प्रांगणे ध्वजारोहणं, राष्ट्रगानं, महात्मागान्धिनः श्रीलालबहादुरशास्त्रिणश्च छायाचित्रयोः पुष्पार्पणं, देशभक्तिगीतं, कवितागानं, भाषणादयश्च कार्यक्रमा अभवन्।

कार्यक्रमे गूगलमीटमाध्यमेन अकादम्याः कोषाध्यक्षः कन्हैयाराम सार्की, प्रो जगदीशप्रसाद सेमवालः, डॉ शैलेशकुमार तिवारी, डॉ कीर्तिवल्लभ शक्टा, जानकी त्रिपाठी, डॉ अरविन्द तिवारी, डॉ एम के सुरेशबाबू, डॉ सर्वेश शान्डिल्य, डॉ मनीषा सिंह इत्यादयः गणमान्यः श्रोतारः उपस्थिता आसन्।

# अन्ताराष्ट्रिय-पाण्डुलिपिसंरक्षणकार्यशाला पाण्डुलिपिविज्ञान-उपाधि -वितरणसामरोहश्च सुसम्पन्नौ

जयपुरम् (राजस्थानम्) विश्वगुरुदीपआश्रम शोध संस्थानस्य तत्त्वावधाने आयोजिता अन्ताराष्ट्रिय पाण्डुलिपिसंरक्षणकार्यशालासुसम्पन्ना।कार्यशालायांराजस्थान-हरियाणा-मध्यप्रदेश- गुजरातप्रान्तेभ्यो नैके प्रतिभागिनः सम्मिलिताआसन्।कार्यशालायांमुख्य प्रशिक्षकः डॉ. सोमबाबू शर्मा (के.सं.वि.वि., जयपुरम्) सारस्वतातिथयः, डॉ. शशिप्रभास्वामी (पुरारसायनवेत्ता) विशिष्टातिथयः, डॉ. धर्मचन्दचौबे (सदस्य, राष्ट्रिय पाण्डुलिपिमिशनभारतसर्वकारः) मुख्यवक्तारः आसन्। समारोहेडॉ. सुरेन्द्रकुमारशर्मणासंपादित 'लिपिबोध' नामकपुस्तकस्य विमोचनंदेवर्षिकलानाथशास्त्रिणा अन्यैश्चविहितम्।



(संरक्षणकर्त्ता, पाण्डुलिपिमिशन, संस्कृतिमन्त्रालय, भारतसर्वकारः) आसीत्।श्रीश्रेयांसः (सदस्य, पाण्डुलिपिमिशन)सहप्रशिक्षकः आसीत्।डॉ. सुरेन्द्रकुमार शर्मा, डॉ. रामदेवसाहू, अभिषेककुमारमिश्रा, नवीनजोशी, आनन्द शर्मा च सन्दर्भ्यव्यक्तय आसन्।कार्यशालाया: सम्पन्नतायाअनन्तरंपाण्डुलिपिविज्ञानउपाधिवितरणसमारोहोऽपि शोध संस्थानसभागारेसमायोजितः।

समारोहमहन्तहरिशंकरदासवेदान्तिनः अध्यक्षाः, प्रो. माताप्रसादः (ज.रा.रा.सं.वि.वि., जयपुरम्) मुख्यातिथयः, प्रो. रमाकान्तपाण्डेयः पाण्डुलिपिविज्ञानविषये डिप्लोमापाठ्यक्रमोत्तीर्णेभ्यः पञ्चविंशतिछात्रेभ्यः उपाधयोऽपिप्रदत्ताः।

कार्यक्रमेडॉ. दयारामस्वामी, वैद्य गोपीनाथपारीकः, प्रो. असितपंजा (राष्ट्रिय आयुर्वेदसंस्थानम्), तिबोरकोकेनी (क्रोशिया-यूरोप), विलियानामाइच (ल्येरका-राइको), नताशाकोसप्रभृतयोऽनेकेविद्वांसः समुपस्थिताः आसन्। शोध संस्थानस्य उपाध्यक्षाः महामण्डलेश्वरस्वामीज्ञानेश्वरपुरीमहोदयाः सर्वेषांआगन्तुकानां धन्यवादं ज्ञापितवन्तः।

# उच्चशिक्षा - "कोरोना के साथ, कोरोना के बाद" विषयम् अवलव्य राष्ट्रियपरिसंवादस्य आयोजनम्

शिक्षासंस्कृति-उत्थानन्यासस्य, भारतीयविश्वविद्यालयसंघस्य संरचनासंस्थानस्य च संयुक्ततत्वावधाने "उच्चशिक्षा कोरोनया सह कोरोनायाः परं च " विषयकराष्ट्रियपरिसंवादस्य आयोजनम् इंदिरागांधिराष्ट्रियकलाकेन्द्रस्य , नवदिल्ल्याः सभागारे कृतम् ।



कार्यक्रमस्य उद्घाटनं केन्द्रीयशिक्षामंत्री धर्मेन्द्रप्रधानः गणमान्याः अतिथियः दीपं प्रज्जवल्य अकुवन्। मंगलाचरण से कार्यक्रम का विधिवत शुभारम्भ हुआ। अतिथीनां स्वागतं भारतीयविश्वविद्यालयसंघः महासचिव डॉ. पंकज मित्तलः अकरोत। राष्ट्रियसचिवः अतुल कोठारी उक्तवान् यत् राष्ट्रियपरिसंवादे उपस्थित सभी विद्वतजनाः अस्मिन् संवादे स्वीपरामर्शान् दद्युः। परिचर्चायां क्रमे अतुल कोठारी अकथयत् कोरोनाकाले देशवासिभिः जीवनं सम्यक् जेतुम् अधिगतवन्तः। मुख्यातिथिरूपेण स्वीये उद्बोधने धर्मेन्द्र प्रधानः कार्यक्रमस्य सफलतायाः शुभकामनाः ज्ञापिताः।

राष्ट्रियपरिसंवादस्य प्रथमसत्रस्य चर्चा "कोरोना कालस्य पश्चात पाठ्यक्रमे परिवर्तनमिति" विषयं प्रति केन्द्रितः आसीत्। यस्य प्रस्तावना प्रो. नागेश्वर रावः स्थापितवान् , ज्ञानोत्तेजकसत्रे प्रो. आर. पी. तिवारी (कुलपतिः, सीयूपी), प्रो. प्रमोद येवले (कुलपतिः, बीएएमयू) एवं प्रो. नीलिमा गुप्तः (कुलपतिः, एचएसजीएसयू) स्वस्य विचारान् स्थापितवन्तः द्वितीय सत्रस्य चर्चा "आत्मनिर्भर भारतहेतवे कौशल शिक्षा एवं उद्यमिता" प्रति प्रो. उन्नत पंडितस्य संचालने सम्पन्ना । सत्रे अभय जेरे, मुदित नारायणनः गणेशन कन्नीवरनश्च प्रतिभागम् अकुर्वन्। यत्र कौशल शिक्षायाः महत्वम्, आत्मनिर्भरभारतस्य निर्माणस्य संदर्भे रेखांकितम् कृतम्। पंकज मित्तलः संचालने भागः गृहीतः प्रो. वी. के. मल्होत्रा, प्रो. एम. पी. पूनिया, प्रो. शिरीष कुलकर्णी एवं डॉ. एस. पी. सिंह अकुर्वन्।

राष्ट्रियपरिसंवादस्य समापनसत्रे उपस्थितानाम् अतिथीनां च स्वागतं शिक्षासंस्कृति-उत्थानन्यासस्य तिमिर त्रिपाठी अकरोत। राष्ट्रियपरिसंवादस्य विशिष्टातिथिः इंदिरागांधीराष्ट्रीयकला केन्द्रस्य अध्यक्षः पद्मश्री रामबहादुर रायः कोरानाकाले उच्चशिक्षायां परिवर्तनविभिन्नायामेषु एकव्यापकदृष्टिः प्रस्तुता।

## सनातनधर्मसेवाफाउंडेशनद्वारा सनातनधर्म गुरुकुलशिक्षां प्रति च विचारः विमर्शश्च



हरिद्वारम्। सनातनधर्मसेवाफाउंडेशनद्वारा आयोजितगोष्ठ्यां 2013तमे वर्षे कानूनवक्फबोर्डप्रॉपर्टीअधिनियमं समापयितुं , यूपीएससीतः इस्लामिक-अध्ययनं च अपसारयितुं सनातनधर्ममंदिरेभ्यः स्वीकृतकरं हिंदूसमाजहिते गुरुकुलशिक्षामंदिराणां विकासे च व्ययीकर्तुं सर्वकारः संदेशयितुं चिंतनं कृतम्। येन प्रकारेण देशे जनसंख्यायाः असंतुलनं वधते तद्दृष्ट्वा निरंतरसनातनधर्मः संकटैः आवृतः अत एव सनातनधर्मस्य रक्षा एव मानवजीवनस्य रक्षा अस्ति। इस विषयेस्मिन् गोष्ठ्याः अध्यक्षतां कुर्वन् डा सीडी काला स्वविचारः व्यक्तीकृतः । आगामिसमये पूर्णदेशे सनातनधर्मसम्मेलनानां आयोजनं कृतम् । जनचेतनायै धर्मचेतनायात्रायाः पूर्णदेशे आयोजनं कृतम्। संगठन मंत्री जी श्रीमहंत विजय प्रकाश ध्यानी देशस्य प्रतिविधानसभाक्षेत्रम् एकं धर्मचेतनादलनिर्माणं कर्तुं एका कार्यसमितिः निर्माय विचारः व्यक्तः।

# साहित्य-अकादेम्याः युवपुरस्कारेण पुरस्कृतः संस्कृतयुवकविः ऋषिराजपाठकः

साहित्य-अकादेम्या 2020 तमाब्दीयसाहित्य-अकादेमीयुवपुरस्कारैः देशस्य चतुर्विंशतिभाषासु चतुर्विंशतियुवकवयः पुरस्कृताः। एषु संस्कृतभाषायां संस्कृतयुवकविः ऋषिराजपाठकः तस्य आद्योन्मेषः इति



काव्यसंग्रहाय पुरस्कृतः। पुरस्कारेऽस्मिन् ताम्रफलकप्रशस्तिपत्रं पञ्चाशत्सहस्ररूप्यकराशिश्च अन्तर्भवतः। अयं पुरस्कारः बैङ्गलूरुनगरे 17.10.2021 तमे दिनाङ्के साहित्य-अकादेम्याः अध्यक्षेण श्रीचन्द्रशेखरकम्बारेण प्रथितसाहित्यकारेण च श्रीमता अरुणकमलेन प्रदत्तः।

आद्योन्मेषे पञ्चसु उन्मेषेषु 51 कवितानां संकलनम् अस्ति। अस्मिन् काव्यसंकलने शतकद्वयम्, एका पञ्चाशिका, नैकानि स्तोत्राणि, स्फुटपद्यानि, गीतानि, लघुकाव्यानि विभिन्नवृत्तेषु उपनिबद्धानिद्य ऋषिराजपाठकः किशोरावस्थात एव संस्कृते काव्यरचनां करोतिद्य तस्य काव्यप्रस्तुतिः देशस्य विविधेषु मञ्चेषु दूरदर्शने आकाशवाण्यां च भवति। तस्य श्रीमदूधमसिंहचरितम् इत्येतन्नामकमेकम् ऐतिहासिकं खण्डकाव्यमप्यास्तेद्य एतदतिरिच्य तस्य नवग्रहचरितम् ऋतुसत्रं चेत्यादीनि नैकानि नृत्यकाव्यानि अपि सन्ति। इतः पूर्वं तस्मै पण्डितप्रतापनारायणमिश्रस्मृतियुवसाहित्यकारसम्मानः अपि लखनऊस्थेन भाऊरावदेवरससेवान्यासेन समर्पित आसीत्।




साहित्य-अकादेमी पक्षतः अमृतसरनगरे २६ /१०/२१ दिनांके युवलेखकसम्मिलनकार्यक्रमस्य एकस्मिन् सत्रे अरविन्दतिवारिणा मनोहरः काव्यपाठः कृतः। काव्यपाठे अमृतसरजलियावालाबागकरवाचतुर्थीतिविषयः सहृदयानां हृदयानि अहरदिति।

सिविल सेवा प्रतियोगी कृपया ध्यान दें!

संघ लोक सेवा आयोग (UPSC) द्वारा आयोजित सिविल सर्विसेज IAS परीक्षा की तैयारियों के लिए आर्य समाज की एक पहल

**आर्य प्रतिभा विकास संस्थान**

**सुशीलराज आर्य प्रतिभा केन्द्र, हरि नगर, नई दिल्ली**

सिविल सेवा परीक्षा 2021-22 के लिए पंजीकरण आरम्भ

आर्यसमाज के शिक्षण संस्थानों/गुरुकुलों/सेवा केन्द्रों/बालवाड़ियों, डी.ए.वी. संस्थानों/ विद्यालयों से शिक्षा प्राप्त ऐसे प्रतिभावान छात्र/छात्राएं जो सिविल सर्विसिज परीक्षा में भाग लेना चाहते हैं किन्तु आर्थिक एवं मूलभूत आवश्यकताओं के अभाव के कारणों से परीक्षा की तैयारियां नहीं कर पा रहे हैं उन सबके लिए आर्यसमाज की ओर से स्वर्णिम अवसर। आर्य प्रतिभा विकास संस्थान की ओर से राष्ट्रवादी विचारधारा वाले, आर्य शिक्षण संस्थानों से शिक्षा प्राप्त सुयोग्य पात्रों को आर्थिक सहयोग एवं परीक्षा की तैयारियों के प्रशिक्षण की घोषणा की गई है। संस्थान द्वारा चयनित अभ्यर्थियों को दिल्ली में छात्रावास, कोचिंग, प्रशिक्षण एवं मार्गदर्शन सहित सभी सुविधायें निःशुल्क प्रदान की जायेंगी। इस निःशुल्क सेवा का लाभ उठाने के इच्छुक उम्मीदवार www.pratibhavikas.org ऑनलाइन आवेदन करें। आवेदन की अन्तिम तिथि 08/11/2021 है।

ऑनलाइन आवेदन की अन्तिम तिथि 08/11/2021

अधिक जानकारी के लिए संपर्क करें-

मो. 9311721172, Email : dss.pratibha@gmail.com

# सम्पादकीयम्

सम्मान्या विद्वांसः!

समोदं प्रणतयः।

महता हर्षेणाहं संस्कृतसंवादस्य नवांकमुपायनीकुर्वन् विज्ञापयामि यत्समायाति शीतकालः शनैश्शनैश्चौर इवेति। अस्माद् भेत्तव्यम्। यतोहि शीतकालः शत्रुवद् भवति। कासज्वरादिरोगा अस्मिन्नेव काले समुत्पद्यन्ते। श्रूयते देशे डेंगूमलेरियाज्वराक्रमणं येन चिकित्सालयेषु रोगिणश्चिकित्स्यमाना विलोक्यन्ते। अतः स्वस्य मशकेभ्यो रक्षा करणीया जनैरिति।

सज्जनाः! सुरभारतीसमर्चनकालो दृष्टिपथमायातः। उत्तरप्रदेशसंस्कृतसंस्थानेन भाषाविभागाधीनेन अस्मिन् मासे महर्षिवाल्मीकिजयन्तीमभिलक्ष्य बहु प्रशंसनीयं कार्यं प्रतिवर्षमिवाक्रियत। शरत्पूर्णिमातिथिरस्ति महर्षिवाल्मीकेजयन्तीतिथिरिति। इमामभिलक्ष्य त्रिदिवसीयमखिलभारतीयं संस्कृतकविसम्मेलनं बहु श्लाघनीयमदृश्यत। दशाधिकाः प्रतियोगिताः समायोज्यन्त ऑनलाइन–ऑफलाइनद्वारेति विजानाति समग्रो देशः। यद्यपि देशे अनेकाः संस्कृतसंवर्द्धनतत्पराः संस्था विलसन्ति किन्तु उत्तरप्रदेशसंस्कृतसंस्थानस्य कार्यं सर्वथा अभिनन्दनीयमस्ति। निदेशकवर्यः पवनकुमारः, अध्यक्षवर्यो वाचस्पतिमिश्रश्चेति सर्वे अधिकारिणः संस्कृतोन्नयनाय नितरन्तरं तत्परा अवलोक्यन्ते।

भद्रजनाः! सम्पूर्णे अपि देशे सर्वैरपि सोल्लासं महर्षिवाल्मीकिजयन्ती समायोज्यत। इयं जयन्ती भारतीयसंस्कृतिं स्मारयति। भगवान् श्रीरामः कथं प्रजामपालयत् कथं पितुराज्ञां पालयन् वनाद् वनं पर्यटन् दानवान् मारयन् धर्मस्थापनामकरोदिति। अतः स्मरन्ति साधवः रामादिवद् वर्तितव्यं न रावणादिवदिति। अस्तु समायाति दीपमालिकापर्व अस्माकं भारतवर्षस्य पवित्रमिति विभावयामि। भवन्तः स्वगृहे सार्वजनिकस्थले सोत्साहं तैलदीपान् प्रज्ज्वाल्य सर्वतस्तमसां संसृतिमपनयन्तु। येन सर्वत्र तमसो मा ज्योतिर्गमय मृत्युमामृतं गमय इत्यस्य वैदिकोद्घोषस्य रवः श्रुतिपथमागच्छेदिति कामये।

अहमग्रिमशुभकामनां प्रयच्छामि भवद्भ्यः सर्वेभ्यः
दीपोत्सवमिमं सर्वे सादरं स्वगृहे बुधाः।
योजयन्तु तमोनाशो जायतां भुवनाद् यतः।।

भवदीयः

अमरवाणी विजयताम्

अतिथिसम्पादकः
अरविन्दः

।। वेद वाणी ।।

**'यूयं तत्सत्यशवस आविष्कर्त महित्वना ।**
**विध्यता विद्युता रक्षः।।**
**गूहत गुह्यं तमो वि यात विश्वमत्रिणं ।**
**ज्योतिष्कर्ता यदुश्मसि।।**

' O Maruts! Ye of the strength of truth, manifest your greatness. Strike the evil forces with your radiant power.""Dispel the horrid darkness from the cave of our life. Drive away the devouring foes far away from us. Show us the light we long for.

The Rig Veda 1.86.9&10

**'त्वादत्तेभी रुद्र शंतमेभिः शतं हिमा अशीय भेषजेभिः ।**
**व्यस्मद्द्वेषो वितरं व्यंहो व्यमीवाश्चातयस्वा विषूचीः।।**
**श्रेष्ठो जातस्य रुद्र श्रियासि तवस्तमस्तवसां वज्रबाहो ।**
**पर्षि णः पारमंहसः स्वस्ति विश्वा अभीती रपसो युयोधि ।।'**

'O! Lord Rudra!"With the medicinal plants, bestowed on us, , we may live for a hundred years. Remove from us hatred, sin and bodily ailments."""O! Lord Rudra! You are the most exalted of all beings in the world.You are the mightiest of the mighty. Keep us far away from the path of sin.'

The Rig Veda 2.33.2&3

**संकलन : एस.वासुदेव रावः**

वेदविज्ञानम्

# पृथ्वीसूर्ययोः पौर्वापर्यविषयकसिद्धान्ताः



**–डॉ. रामदेवसाहूः**
प्रोफेसर एवं विभागाध्यक्ष
विश्वगुरुदीप आश्रम शोधसंस्थानम्
जयपुरम् (राजस्थानम्)

सृष्टिक्रमसन्दर्भेसन्दिहानाः अनेकेविद्वांसोऽद्यापिपृथ्वीसूर्ययोः पौर्वापर्यविषयेसन्देहंप्रकटयन्ति। केचनप्रवदन्ति यत् प्रथमंसूर्यआविर्भवति, तदनन्तरंपृथिवीआविर्भवति। आधुनिकास्तु एवमपिजल्पन्ति यत् सूर्यादेवभग्नेयंपृथिवीवर्तते, अतः तेषांमतानुसारमपिसूर्योत्पत्तिरेवआद्या, पृथिव्योत्पत्तिश्चानन्तरीयेतिस्पष्टमेव। केचनान्येभूतसृष्टेरादिमत्वंमत्वा पिण्डसृष्टेश्चानन्तरीयकत्वंस्वीकृत्य पञ्महाभूतोत्पत्तेरनन्तरमेवसूर्यचन्द्रादिग्रहाणां नक्षत्राणांतारकाणांचेत्यकाशीयपिण्डानामुत्पत्तिंप्रतिपादयन्ति। तेषांकथनमस्तिपृथिवीतत्वंविनासूर्यस्य तत्त्वान्तराणांपिण्डीभाव एव न सम्भवति, अतएवपूर्वंपृथिवीमहाभूतमपिअकाशादिमहाभूतानामुत्पत्तिक्रमेसम्भूता। अन्यथा द्यावापृथिव्यात्मकस्य त्रैलोक्यस्य अण्डरूपेनिर्मितिः कथंसेत्स्यति। न हि त्रैलोक्यस्य अर्धाण्डंपूर्वोत्पन्नं न च अर्धाण्डंपश्चादुत्पन्नमितिवक्तुं शक्यते। एवंचेदनेकाविप्रतिपत्तयोदृष्टिपथंसमायाताः।अस्मिन् विषयेसमालोचनामावश्यकींमत्वापण्डित मधुसूदनओझा महोदयैरहोरात्रवादेकतिचन सिद्धान्ताः प्रस्तुतास्तेऽवश्यं चिन्तनीयाः प्रतीयन्ते–

**1. महर्षियाज्ञवल्क्यस्य सिद्धान्तः**

शतपथब्राह्मणस्य द्वितीयकाण्डस्य द्वितीयप्रपाठकान्तर्गतं द्वितीयब्राह्मणेअस्य सिद्धान्तस्योल्लेखोऽस्ति । तदनुसारंप्रथमंपृथ्वी एव समुत्पन्ना, न तुसूर्यः।अयमुल्लेखोनिम्नानुसारंवर्तते–

प्रजापतिर्ह वा इदमग्र एक एवास। स ऐक्षत–कथंनुप्रजायेयेति।सोऽश्राम्यत्। स तपोऽतप्यत। सोऽग्निमेवमुखाज्जनयाँचक्रे। तद्यदेनंमुखादजनयत। तस्मादन्नादोऽग्निः। स ऐक्षतप्रजापतिः –अन्नादं वा इममात्मनोऽजीजने यदग्निम्। न वा इहमदन्यदन्नमस्ति यं वा अयंनाद्यादिति। काल्वालीकृताहैवतर्हिपृथिव्यास। नौषधय आसुर्नवनस्पतयः। तदेवास्य मनस्यास, अथैतमग्निर्व्यात्तेनोपपर्याववर्त्त।तस्य भीतस्य स्वोमहिमापचक्राम।वाग्वाअस्य स्वोमहिमावागस्यापचक्राम । स आत्मन्नेवाहुतिमीषे स उदसृष्ट। तत्र विवेद घृताहुतिंवैवपय आहुतिं वा–उभयंहत्वेवतत्पय एव । साहैनंनाभिराधायाँचकार । केशमिश्रेवहास।तांव्यौक्षद् ओषधयेति।ततओषधयः समभवन्। स द्वितीयमुदसृष्ट, तत्रापरामाहुतिंविवेद, घृताहुतिंवैवपय आहुतिंवा। साहैनमभिराधेयाँचकार। सोऽजुहोत्।तत एष उदियाय य एष तपति।ततोऽयं प्रबभूव– योऽयं पवतेतत एवाग्निः पराङ् पर्याववर्त्त। स हुत्वाप्रजापतिः प्रचाजायतअत्स्यतश्चाग्नेर्मृत्योरात्मानमत्रायत। (श.ब्रा.–2/2/2)

उपर्युक्तसिद्धान्तेन स्पष्टीभवति यत् पूर्वंपृथिवीसमुत्पन्नाआसीत्।पश्चात् ओषधयः समुत्पन्ना।ओषधीनांबलंऊर्जंकथंसम्भवेदितिकृत्वाऽन्नादेनैवाग्निना यथापूर्वमन्नमुत्पादितंतथैवपश्चात् तद्रक्षणाय सूर्यउत्पादितः।

**2. बार्हस्पत्यसिद्धान्तः**

तैत्तिरीयादिवैदिकसंहितासु बार्हस्पत्यसिद्धान्तस्य उल्लेखाः क्वचनविहिताः।तदनुसारंपूर्वंपृथिवीयमाग्नेयी एवासीत्।तादनींसूर्योनाविद्यत।इयंपृथिवी एव अग्निरश्मीर्निस्सारयामास। तासामग्निरश्मीणांप्रभावेण–अदितिपुत्राणामादित्यानांसंघातः समजायत। अतएवतैत्तिरीयशाखाध्यायिनः पृथिवीवत् रात्रिमाग्नेयींअहश्चैन्द्रंस्वीकुर्वन्ति।

अदितिः प्रकृतिरासीदितिविषयेनास्तिकस्यचनापिविमतिः। प्रकृत्याअस्तित्वंपृथिवींविना न सम्भवतीतिवर्ततेवैज्ञानिकंसत्यम्। अदितिरूपाप्रकृतिः पृथिव्याः साहचर्येणप्रथममुत्पन्ना। तस्या–अदितिरूपायाः प्रकृत्या एव ये द्वादशादित्याः समुत्पन्नास्तेपृथिव्यन्तर्निष्ठाग्नेरेव द्वादशरश्मिपुञ्जान्यासन्।तेषांसंघात एव सूर्यरूपेणाविर्भावंलब्धवान्।

अतएव मधुसूदनओझा महोदयाउल्लिखन्ति–

'बृहस्पतेश्चाप्यदितेर्मतेऽसौपूर्वंपृथिव्यासततोऽभवद् द्यौः' (अहो. 5/10)

अर्थात् पूर्वसम्पूर्णं त्रैलोक्यमण्डलंपृथ्वीमयमेवासीत्। यदासूर्यआविर्भवत् तदा त्रैलोक्यस्योपरिभागः द्यौरितिइमांसंज्ञांलब्धवान्।

**3. महर्षिभरद्वाजस्य सिद्धान्तः**

महर्षिभरद्वाजस्य सिद्धान्तोऽपि वैदिकसंहिताग्रन्थेषु एवोल्लिखितोऽस्ति।ऋक्संहितायाः षष्ठेमण्डले–दशममण्डलेचापिअस्य संकेताउपलभ्यन्ते। तदुनसारंपुत्रः पश्चाज्जायतेपितरौतत्पूर्वमेवविद्येते।सूर्यस्य पितरौअदितिः अग्निश्चावर्तताम्। अदित्यग्न्योरुभयोराश्रयः पृथिव्येवासीत्। न हिपृथिवींविनाअदितिर्भवति, न चाग्निः। अपि च द्यावापृथिव्योरस्तित्वंविनावैश्वानराग्निः न सम्भवति। यथोक्तम्–

'कृष्णाहरुर्वीरविरर्जुनाहर्द्यावापृथिव्यौरजसीइमेते।
विवर्त्तमानेरजसीततोऽभूद् वैश्वानरोऽग्निःसतमोनिहन्ति।।' (अहो. 2/53)

अयंवैश्वानराग्निर्यः द्यावापृथिव्योरुत्पद्यते, स एव सूर्यस्य वास्तविकोजनिता। न हिवैश्वानराग्नेः सत्वंविनासूर्यः तमोविनाशाय प्रभवितुं क्षमते।ओझा महोदयाः एतन्मतमेवमुल्लिखितवन्तः–

'पुत्रंपरस्तात्पितरंत्ववस्तादृषिर्भरद्वाजइहानुवक्ति।
तथाग्निपुत्रोवदते स केतुर्वैश्वानराग्नेरविरुद्धबर्हः।।' (अहो. –2/55)

उपर्युक्तोल्लेखेनविज्ञायते यत् वैश्वानराग्निपुंजः केतुरित्युच्यते। अयंकेतुः प्रथमंप्रभवति स द्वादशादित्यानामिन्द्रादीनांसम्पर्कमवाप्य स्वयमेवसूर्यरूपेणात्मानंपरिणमति। एवंसूर्योत्पत्तिरानन्तरीयैवसिद्ध्यति।

**4. विश्वकर्मप्रतिपादितसिद्धान्तः**

विश्वकर्मप्रतिपादितसिद्धान्तस्योल्लेखाः तैत्तिरीयसंहितायां, तैत्तिरीयब्राह्मणे, तैत्तिरीयारण्यके, ताण्ड्यमहाब्राह्मणेचोपलभ्यन्ते। तदनुसारंविश्वकर्मेदंप्रतिपादयति यत् यथाशिशोराविर्भावेशिरः पादौ च युगपत् गर्भेसमाहिताभवन्ति, तथैव त्रैलोक्यस्य त्रयोलोकाः युगपदाविर्भवन्ति। द्युलोक–अन्तरिक्षलोक–पृथिवीलोकानामाविर्भावेआनुक्रमिकतानास्ति। अतएवतयोः पौर्वापर्यकल्पनातुकर्त्तुमेव न शक्यते। एवंचेद् द्यावापृथिवी युगपदेवोत्पन्नौ। यथोक्तम्–

'द्यावापृथिवीसहास्ताम्।तेवियतीअब्रूताम्–अस्त्वेवनोसह यज्ञियमिति। यदस्या यज्ञियमासीत् तदमुष्यामदधात्। तददश्चन्द्रमसि कृष्णम्।' (तै.सं. 5/2/3, तै.ब्रा. 1/1/3, ताण्ड्य 7/10)

उपर्युक्तश्रुत्यापृथ्वीचन्द्रयोः साजात्यंप्रमाणितंभवति, न तुपृथ्वीसूर्ययोः।अपिचान्यत्र चन्द्रस्यान्तरिक्षवर्त्तित्वश्रवणादिहपृथ्वीसूर्ययोर्वियतोरेववि– यत्त्वमभ्युपगम्यते। अथवाचैवमपिस्याद्यत् सृष्ट्यादौचन्द्रपृथिव्योः सहवस्थानंस्यात्।

अत्रेदमपिकेचनप्रवदन्ति यत् चन्द्रः सोमप्राधान्यादन्नमयम्। सूर्यश्चअग्निप्रधान्यादन्नारूपः। यथा च लोकेऽन्नादानांप्राणिनामुत्पत्तेः पूर्वमन्नमुत्पन्नंभवतितथैवसूर्योत्पत्तेः पूर्वंचन्द्रोत्पत्तेरप्यौचित्यंपरिलक्षितंभवति। एवंचेत् चन्द्रपृथिव्योः सहावस्थानस्वीकारे न दोषोऽभ्युपपगन्तव्यः।

(क्रमशः)



## वन्दे भारतदेशम्

–अरविन्दकुमारतिवारी

वहति सुपवनो मन्दं मन्दं चन्दनरससंसिक्तः
ज्वलति पवित्रश्चाग्निर्यज्ञे यत्र मन्त्रसम्पृक्तः।
नृत्यति वसुधायां स्वर्गीयो वैभवराशिर्नित्यं वन्दे भारतदेशम् ।1

हिमगिरितनया वहति च गंगा रक्षति मनुजप्राणान्
प्रहरिसमोऽयं पर्वतराजः कुरुते शत्रोस्त्राणम्।
प्रातस्सायं देवमन्दिरे गुंजति दिव्यस्तवनं वन्दे भारतदेशम् ।2

हिन्दू–मुस्लिम–सिक्ख–इसाईजना वसन्ति प्रीत्या
परस्परं निजराष्ट्रविकासं कुर्वन्तीमे धृत्या
यत्र द्रष्टव्या नेतारस्तेषां कृत्यं स्तुत्यं वन्दे भारतदेशम् ।3

होलीदीपावलीदशहरा राजन्तेऽस्मिन् देशे
विविधा वर्णा रुचिरजनानां दृश्यन्तेऽद्भुतवेशे
षड् ऋतवो विचरन्ति निकामं सर्वेषां गृहकोणे वन्दे भारतदेशम् ।4

झाँसीराज्ञीयशः श्रूयते सश्रद्धं विज्ञेयं
सीताचरितं यत्र गीयते पावनगेहे गेयम्
वन्द्या व्रतं चरन्त्यो महिला लक्ष्यन्ते प्रतिग्रामं
वन्दे भारतदेशं वन्दे भारतदेशम् ।5

## करवाचतुर्थी विजयताम्

चन्द्रः क्वचिल्लीन इवास्ति धूर्तो घनावलीभिर्बहु वन्द्यमानः।
पश्यन्ति खं काश्चिदहो विमुग्धाः पतिं वराकं तमसां विलासे।। १

वरो विवाहे भवतीव चन्द्रस्ततस्तमोमण्डनमण्डितास्यः।
पतिंवरा कं करवाचतुर्थ्यां पतिं वराकं न विलोकते सा।। २

कृष्णाननं वीक्ष्य तमोविलीनं व्यग्रा नवोढा किल चिन्तिता या।
चन्द्रं मुहुः प्रार्थयते भवन्तं तस्यां कथन्नो दयसे दयालो!!३

चन्द्राननं नो सहते व्रतेऽपि प्रिया प्रियास्यं निशि लोकमाना।
चन्द्राननां चन्द्रमुखोऽपि पश्यन् तनोति रागं करवाचतुर्थ्याम्।। ४

गृहस्थधर्मस्य महान् प्रमोदः संवर्द्धतां कामयते विधुश्रीः।
स्याज्जजीवनं सौख्यमयं समेषामिति व्रतं शिक्षयतीह नूनम्।।५

## माता स्वपुत्रं विजहाति कुत्र।।

(माँ अपने पुत्र को भला कहाँ छोड़ती है ?)

तमोनिमग्नं शितशूलयुक्तं
गम्भीरगर्त्तं कुपथं व्रजन्तम्।
जनं विपन्नं परिपाहि शीघ्रं
माता स्वपुत्रं विजहाति कुत्र ।।1।।

आपद्–गतं त्वं कुमतिं प्रमत्तं
कथं जहासीव विभासि पुत्रम्।
शुष्कोऽधुना किं ममतार्णवस्ते
माता स्वपुत्रं विजहाति कुत्र ।।2।।

असंख्यदोषा मयि सन्ति, सन्तु
त्वं नासि किं स्वात्मजदोषहन्त्री।
अपाकुरु त्वं मम दोषजालं
माता स्वपुत्रं विजहाति कुत्र ।।3।।

पुत्रः कुपुत्रो भवतीति लोके
जानन्ति सर्वे नहि संशयोऽत्र।
माता कुमाता नहि कापि दृष्टा
माता स्वपुत्रं विजहाति कुत्र ।।4।।

मूढातिमूढं बहुदोषभाज–
मप्यात्मजं नार्हसि हातुमत्र।
त्वयैव सृष्टं सकलं न किं तद्?
माता स्वपुत्रं विजहाति कुत्र ।।5।।

यदा कुपुत्रो नहि रोचते ते
तदा कथं त्वं सृजसीह तं कौ।
दायित्वमेतत् तव नास्ति किम्भो
माता स्वपुत्रं विजहाति कुत्र ।।6।।

लोकेऽत्र कुत्राप्यथवान्यलोके
त्वया विना मे गतिरेव नास्ति।
क्षान्त्वापराधानवलम्बनं स्या
माता स्वपुत्रं विजहाति कुत्र ।।7।।

उदारदृष्टिः करुणार्णवोऽसि
दयार्द्रचित्ता जगतां हिताय।
न विस्मर त्वं निजसौम्यरूपं
माता स्वपुत्रं विजहाति कुत्र ।।8।।

न मेऽस्ति शक्तिर्न मतिर्न भक्ति
विद्या गुणो नेतरसाधनं वा।
अकिञ्चनं मां परिपश्य मात
माता स्वपुत्रं विजहाति कुत्र ।।9।।

जाने न पूजां न तपो व्रतं वा
सेवां न योगं नहि चान्यमार्गम्।
त्वमेव मां प्राप्नुहि दीनबालं
माता स्वपुत्रं विजहाति कुत्र ।।10।।

## दीनबन्धो

–महाचार्य्यः मनतोषः भट्टाचार्यः

त्वमस्यातिदीनस्य दासस्य बन्धुः
सहायस्समस्तापदामेव जाने।
यतोऽहं पटुर्नो नदीतारणेऽस्मि
त्वमेकोऽसि नौका नदीतारणाय।।१।।

जनो यो न जानाति सन्तारणं वा
कृतार्थो न वा बन्धुसंयोगपुण्यैः।
स दुर्भाग्ययुक्तोऽतिभीतः विपन्नः
कथं निम्नगातिक्रमे सक्षमस्स्यात्।।२।।

सदा नक्रकुम्भीरदुर्दान्तमीना
जले तत्र नद्याश्चरन्ति प्रकाण्डाः(प्रकामम्)।
जनस्तारणज्ञोऽपि तत्तुं क्षमो नो
ततोऽहं न दक्षो म्रिये निम्नगायाम्(मज्जमानः)।।३।।

न वा केवलं भीषणा नक्रमीना
जले निम्नगायाः वसन्ति स्थलेऽपि।
विशालाः खला जन्तवस्ते नृरूपाः
कृशं दुर्बलं मां सदा भाययन्ति।।४।।

कदाचित् कथञ्चित् कुतश्चिच्च कश्चिन्–
न किञ्चिच्च सच्चिद्ददाति प्रपन्नम्।
त्वमेव प्रभो हे त्वमेव प्रभो मे
कृपां नो करोषि प्रपन्नो न जीवेत्।।५।।

अशिष्टेष्वशिष्टं जनं यश्च शिष्टः
सदेष्टं ददाति तमिष्टं भजेऽहम्।
न जाने कदा त्वं कथं त्वन्त्वनिष्टं
ममेष्टप्रभो त्वं निहंसि प्रियार्थम्।।६।।

न वाकाशमार्गेऽपि मे शान्तिरस्ति
तथा भीषणा पक्षिणश्श्येनगृध्राः।
सदा ते तु तुण्डैस्सुतीक्ष्णैर्नखैश्च
खगञ्चातकं मां निपीड्य प्रसन्नाः।।७।।

खगेन्द्रासनस्थ त्वमेकस्तु भीतं
खगेभ्यः खगारक्षणे रक्षकोऽसि।
न चेत् क्षीणदेहस्तु पक्षी क्षमस्स्यात्
स्वसंरक्षणेऽरक्षितं रक्ष मां त्वम्।।८।।

स्थले निम्नगायां वने चान्तरीक्षे
न कोऽप्यस्ति देवं विना दुर्बलानाम्।
क्षमो रक्षणे हे प्रियदीनबन्धो
सदा रक्ष दीनातिदीनातिदीनम्।।९।।

धनैर्विद्यया वैभवेनातिबुद्ध्या
स्वशक्त्या स्वजात्या स्ववर्णेन किंवा।
न चाहं क्षमोऽस्मि स्वसंरक्षणे भोः
सदानाथनाथ प्रभो रक्ष रक्ष।।१०।।

## भवतु कालिका लोकपालिका

आचार्यः शैलेशकुमारतिवारी
उत्तराखंड संस्कृतविश्वविद्यालयः

निजजनाखिलानिष्टवारिका
समददैत्यवृन्दारिदारिका।
करकपालिका भव्यभालिका
भवतु कालिका लोकपालिका ।।1।।

भुवनभासिनी सर्वशासिनी
हृदयवासिनी चारुहासिनी।
शिवविलासिनी सृष्टिचालिका
जयतु कालिका लोकपालिका ।।2।।

अरिविदारिणी दैन्यदारिणी
मदनिवारिणी कष्टवारिणी।
असुरमारिणी मुण्डमालिका
जयतु कालिका लोकपालिका ।।

धरणिधारिणी भक्ततारिणी
भुवि विहारिणी दुःखहारिणी।
सकलकारिणी कौ करालिका
जयतु कालिका लोकपालिका ।।

प्रणतपोषिणी शोकशोषिणी
परमतोषिणी दोषकोषिणी ।
सुजनजोषिणी हृद्विशालिका
जयतु कालिका लोकपालिका ।।

भवविधायिकाभीष्टदायिका
भयदभायिका भूतिसायिका।
अमृतपायिका शिष्टलालिका
जयतु कालिका लोकपालिका ।।

नहि विना यया कापि साधना
नहि विना यया कापि कल्पना।
सकलसाधिका सा शिवालिका
जयतु कालिका लोकपालिका ।।

जगति भुक्तिमुक्तिप्रदायिनी
सुमतिसिद्धिविद्यादिदायिनी।
सममयी जगद्भ्रूविलासिका
जयतु कालिका लोकपालिका ।।

द्विडवमानिनी स्वाभिमानिनी
नवलनित्यमोदप्रतानिनी ।
अभयतानिनी सर्गजालिका
जयतु कालिका लोकपालिका ।।

अवतु सज्जनान् दीनवत्सला
भवतु मङ्गलादिप्रदा सदा।
सकलसंकटोच्छेदकारिका
जयतु कालिका लोकपालिका ।।

### पाठकानां कृते सूचना

कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुक्लः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्

**Sanskrit samvad,**
**Current A/C No. 22490200000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**

# बहुषु देशेषु रामायणस्य श्रीरामस्य च प्रभावः,

## महर्षिवाल्मीकिसंस्कृतविश्वविद्यालये समारोहः

कैथलम्। विश्वविद्यालये महर्षिवाल्मीकिजयंत्याः उपलक्ष्य समारोहस्य आयोजनं कृतम्। कार्यक्रमस्य शुभारंभः दीपप्रज्ज्वलनेन कृतः। मुख्यातिथिः संस्कृतभारत्याः अखिलभारतीयसंगठनमंत्री दिनेश कामतः महर्षिवाल्मीकिः संस्कृतभाषायां रामायणस्य रचना कृता। विश्वे देशेषु रामायणस्य श्रीरामस्य च प्रभावः अस्ति।



तेनोक्तं मुस्लिमदेशः, इंडोनेशियायाः राष्ट्रियनाटकं रामायणम अस्ति। मुस्लिमदेशस्य सऊदीअरबदेशीयविद्यालयेषु रामायणस्य महाभारतस्य पठने बलं दत्तम्।

लंदनदशे एक सेंट जोसफविद्यालये संस्कृतम् अनिवार्यम्। तेनोक्तं यत् संस्कृतं पठितुं गणितं, विज्ञानं च सर्वाः यूरोपियनभाषाः सरलतया अवगन्तुं शक्यते। कैथले संस्कृतविश्वविद्यालयस्य स्थापना कृता।

तत्र मुख्यवक्तृरूपेण समाजसेवीशांत प्रकाश जाटवः आसीत। शांतिमंत्रेण कार्यक्रमस्य समापनं कृतम्। अध्यक्षरूपेण विश्वविद्यालयकुलपतिः प्रो. राजकुमार मित्तलः आसीत।

प्रो. अभिराज राजेंद्रः प्रो. मान सिंहश्च संस्कृतसाहित्यालंकारसम्मानेन सभाजितौ

हरियाणासंस्कृताकादमी 2019- 2020 वर्षाय पुरस्काराणां.घोषणाम् अकरोत् । 2019 वर्षाय प्रो. अभिराज राजेंद्र मिश्रः (हिमाचल प्रदेशः) वर्ष 2020 तमाय वर्षाय प्रो. डा. मान सिंहः (उत्तराखंडः) संस्कृत साहित्यालंकारसम्मानाय चितः। अकादमीनिदेशकः चतुर्णां वर्षाणां कृते सम्मानपुरस्कारान् उद्घोषितवान् ।

प्रतिसम्मानं भिन्नभिन्नं च। संस्कृतसाहित्यालंकारसम्मानाय हरियाणासंस्कृतगौरवसम्मानाय च साहित्यकाराय द्विलक्षं रुप्यकाणि प्रशस्तिपत्राय प्रदत्तम् । महर्षिवाल्मीकि सम्मानाय, आचार्य

सम्मानाय, महर्षिविश्वामित्रसम्मानाय च सार्धैकलक्षं रुप्यकाणि देयानि सन्ति महाकवि बाणभट्ट सम्मानं, गुरु विरजानंदः, आचार्य सम्मानाय, विद्या मार्तंडः, पं.सीताराम शास्त्री, आचार्य सम्मानाय, पं. युधिष्ठिर मीमांसकः आचार्य सम्मानाय, स्वामी धर्मदेवः संस्कृतसमाराधकसम्मानाय, विशिष्ट संस्कृतसेवासम्मानाय च एकलक्ष रुप्यकाणां पुरस्कारराशिः प्रदीयते।

# काशीविद्वत्परिषदः राष्ट्रियकारिणीसंगोष्ठी आयोजिता

अद्य श्रीकाशीविद्वत्परिषदः राष्ट्रियकार्यकारिण्याः गोष्ठी अभूत् हनुमानप्रसादपोद्दार-अंध -विद्यालयदुर्गाकुंडे पूज्यसाधूनां संरक्षणे महामण्लेश्वरप्रखरमहाराजः अखिलभारतीयसंतसमितेः महामंत्री स्वामी जितेन्द्रानन्द सरस्वती ,कमिश्नर दीपक अग्रवालः उपस्थिताः आसन्। पद्मश्री प्रो. आचार्यः रामयत्न शुक्लस्य अध्यक्षतायां सर्वेषां विदुषाम् उपस्थितिः आसीत्। प्रो. वशिष्ठ त्रिपाठी,




प्रो, राम चन्द्र पाण्डेयः, प्रो. गोपबन्धु मिश्रः, प्रो सदा शिव द्विवेदी प्रो. भगवत शरण शुक्लः, डा रमाकांत पांडेयः, डा दिनेश कुमार गर्गः, डा गणेश दत्त शास्त्री, प्रो. शंकर मिश्रः, प्रो माधव जनार्दन रटाटे ,प्रो विनय कुमार पाण्डेयः, प्रो चंद्र मौली उपाध्यायः, डा रामाश्रय शुक्लः, डा शुकदेव त्रिपाठी, डा दिव्य चेतन ब्रह्मचारी, डा वरुणेश चंद्र दीक्षित, प्रो. हर प्रसाद दीक्षितः, पं सतीश चंद्र मिश्रश्च सहिताः अनेके गणमान्याः जनाः उपस्थिताः आसन्। पं गोविन्द शर्मा खेमकावर्येण, अखिलेशेन च सहिताः सर्वे जनाः उपस्थिताः आसन्। सम्पूर्णकार्यक्रमस्य संचालनं संयोजनं च काशीविद्वत्परिषदः महामंत्री प्रो. रामनारायण द्विवेदी गुरुः अकरोत्।

# आचार्य प्रो. अलंकाराय महर्षिवाल्मीकिसम्मानं समुद्घोषितम्



पंजाबविश्वविद्यालयस्य संस्कृतविभागस्य अध्यक्षः , संस्कृतकविः समीक्षकः प्रो. वी. के. अलंकारः हरियाणासंस्कृताकादमीद्वारा महर्षिवाल्मीकिपुरस्काराय चितः प्रो. अलंकारः गतेभ्यः एकत्रिंशद्वर्षेभ्यः पीयू इत्यत्र संस्कृतशास्त्राणाम् अध्यापनं कुर्वन् वर्तते। गत 2020वर्षे डॉ. अलंकारस्य एकं नूतनं काव्यं वाल्मीकिप्रशस्तिकाव्यं प्रकाशितम्। इनके दो काव्य प्रपंचपञ्चशती, भारतीकाव्यं च अपि प्रकाशनाय सिद्धे वर्तेते। तदतिरिक्तं वेद, व्याकरण, दर्शनं ,पाली , साहित्यं च आधारीकृत्य पञ्च ग्रन्थाः संस्कृत काव्यं चापि प्रकाशितम्। इतः पूर्वम् अपि बहूनां राज्यानां द्वारा संस्कृतसाहित्य सम्मानेन, बाणभट्टपुरस्कारेण, वेदव्यास पुरस्कारः साहित्यशिरोमणिना च अलंकृतः आचार्यः अयम। प्रो. अलंकारः बहुषु काव्येषु ग्रन्थेषु च बहुषु च विश्वविद्यालयेषु शोधकार्यम् अकरोत्।

# महर्षिवाल्मीकिजयंत्याः अवसरे उत्तरप्रदेशसंस्कृत- संस्थानद्वारा विशालसंस्कृतप्रतियोगितानाम् आयोजनं चित्राणि













अस्माकं प्रेरणास्रोतः- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः, डॉ. अरविन्दकुमारतिवारी, डॉ. राधेश्यामअवस्थी
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलः- डॉ.सुन्दरनारायणझा, डॉ. सुरेन्द्रमहतो, डॉ. सन्नीकुमार, डॉ. संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेल: sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।